M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref. / Ser. V/24

Title: Tarka Sangraha Dipika

V/24

Incomplete

	Tarka Sangraha Dipika	Title
	Annam Bhatt	Author
	Shankar Bhanji	~~Editor~~ Scribe
	Samvat — 1824	Year, Vols.
S/C		Publisher
V/24	Presented by Prof. V. R. Trivedi	Remarks

स्प. ३

ति। पृथिव्यादिस्वनु [illegible] स्यपरमाएवं।। आकाशादिरं [illegible] कं [illegible] ... [illegible] ...ति ऊते। प्राणे

ा व [illegible] ानत्रे [illegible] देवाक मानु सारा [illegible] यम पृथि [illegible] [illegible] माद। गंधावती [illegible] ... [illegible] ...िया

भि [illegible] [illegible] नुरस्ससुरस्य [illegible] [illegible] ष्टवोपर्तविरोधे [illegible] धानुसा [illegible] [illegible]

त्रती ति [illegible] नवित्र गेधानेगी [illegible] [illegible] के वोस [illegible]

[illegible] [illegible] नुजल्हादा वपिशं [illegible]

धार [illegible] [illegible] वि यांल्हरुए [illegible]

[illegible] ज्ञते। [illegible] विधे [illegible]

[illegible]

[illegible] दंडिपदं [illegible]

[illegible] सर्गवो [illegible]

[illegible] पांगेत्याश्र [illegible]

[illegible] ... [illegible]

ध ३

मा। विश्वेश्वरं सांबमूर्त्तिं प्रणिपत्य गिरं गुरुं। टीकां शिशु[illegible]ं कुर्वे तर्कसं[illegible]ग्रहदीपिका। १ चिकीर्षितस्य ग्रंथस्य
यथं शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं [illegible]नमस्कारलक्षणं मंगलं शिष्यशिक्षार्थं निबध्न
नीति। निबध्नीयेति। ननु मंगलस्य समाप्तिसाधनत्वं नास्ति [illegible]लिकृते किरणावल्यादौ समाप्त्यदर्शनात्। मंगला
समाप्तिदर्शनात्। अन्वयव्यतिरेकव्यभिचारादिति चेन्न। किरणावल्यादौ विघ्नबाहुल्यात्समाप्त्यभावः। कादंब
[illegible]कृतं। अतो न व्यभिचारः। ननु मंगलस्य कर्त्तव्यत्वे [illegible]प्रमाणमिति चेन्न। शिष्टाचारानुमितश्रुतेरेव प्रमा
बोधितकर्त्तव्यताकं। अलौकिकादिविशि[illegible]चारत्वात्। दर्शादिवत्। भोजनादौ व्यभिचारवारणाय
[illegible]न्ति[illegible] शिष्टपदं [illegible] स्पार्थी न कुर्यान्निष्फलं कर्म इति [illegible]नादेरपि
[illegible]सं[illegible] :संक्षेपेण स्वरूपकथनं क्रियत इत्यर्थः। कस्मै
[illegible]र्थं ज्ञानं तस्मात्[illegible] इत्यर्थः। ननु बहुश्रुतकं ग्रंथेषु सत्सु कि १ शिव
[illegible]भावात्। बालाना[illegible] धीनं भवतीत्यर्थः। ग्रहणधारण

८

स्प॰ २

ति। पृथिव्यादिचतुष्टयस्य परमाणवः। आकाशादिरेकैक[illegible]नित्य[illegible]नासील्यात्। समवायस्त्विति। अनावंविभज्यते। नागं
[illegible] हेत्वा[illegible]मानुसारात् प्रथमं पृथिवीलक्षणमाह। गंधवतीति। नाम्नाप[illegible]र्थसंकीर्त्तनं उद्देशः। उद्देशक्रमेण च सर्वत्रैव निपा
भि[illegible]लक्षणस्य चलवात्[illegible]प्रविपर्यवियो[illegible]गंधानुसा[illegible]व्याप्तिः। न च तत्र गंधवती त्यनुपपत्तिरिति वाच्यं। अवयवगंधस्यैव तत्र
प्रतीति[illegible]नन्चित्रगंधानंगीकारात्[illegible]विरोधादा[illegible]व्याप्तिरिति चेन्न। गंधसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षि
[illegible]नुजलादावपि गंधप्रतीतेः[illegible]मिति चेन्न। अन्वयव्यतिरेका[illegible]गंधस्यैव तत्र च। नांगीकारात्। ननु तथापि कालस्य सर्वा
धार[illegible]वर्णाणां का[illegible]व्याप्तिरिति[illegible]सर्वाधारता प्रयोजकसंबंधेन गंधसंबंधेन लक्षणसत्त्वस्य अ[illegible]नित्यत्वात्। पृथिवीं वि
भजते। सा द्विविधेति। नित्यत्वं ध्वंसाप्रतियोगित्वं। ध्वंसप्रतियोगित्वं अनित्यत्वं। प्रकारांतरेण विभजते। पुनरिति। आत्मनो भायतनं शरीरं। यत्र व
[illegible]ति[illegible]लक्षणं[illegible]कारणे[illegible]श्चेतरत्व[illegible]विशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगा
श्रयत्वं इंद्रियत्वं[illegible] एवं च गंधवच्छरीरं पार्थिवशरीरं गंधग्राहकं इंद्रियं पार्थिवेंद्रियं। गंधवान्विषयः पार्थिवविषय इति
[illegible]शरीरं[illegible]पार्थिवशरीरं[illegible] शरीरमिति। इंद्रियं ग्राणमिति। इंद्रियमिति। गंधग्राहकमिति प्रयोजनकथनं। घ्राणमिति
[illegible] एवमुक्त[illegible]पार्थिवविषयं दर्शयति। मृत्पाषाणेति। अपो लक्षणमाह। शीतेति। उत्पन्नविनष्टजले[illegible]

ध २

साकार [illegible] तस्य [illegible] ताधि [illegible] यतिमते तात्पर्यं । शीतं विजातत्व मित्यादे उल्लसंबंधेदेव च । तस्पर्शत्वावैनमितिन ।
पि व्याप्ति । अनेन व द्वितीत [illegible] । उष्णस्पर्शवदिति । उष्णत्वमिति प्रतीति [illegible] तेजः संबंध अनुविधायित्वा
वनाव्याप्तिः । विषयं विना [illegible] नानुक्तं पार्थिव पीतत्वात् । गुरुत्वात् । हरिताहि [illegible] त्यते । [illegible] तानलसंयोगसति घृतादौ
[illegible] । [illegible] संयोगयोः कार्यकारणभावा
[illegible] लसंयोगसत्व [illegible] नद्रव्यत्व
[illegible] वा चास्तु अनंत
[illegible] पार्थिव [illegible] तव [illegible] नतस्मात्सुवर्णं तेज
[illegible] इति अथ [illegible] व्याप्ति वारणाय रू
[illegible] एक एव प्राणः स्यान्न ते दात प्राणापानादिनो हे २१
[illegible] वायुः [illegible] प्रत्यक्ष [illegible] वायौ वातिसति अनुष्णाशीतस्पर्शाभावत्तेसः स्पर्शवत्किंचिदाश्रितः ।
[illegible] यः । [illegible] नियामात् । नउष्णतेजसोः । अनुष्णाशीत

कोजीवः । सुखदुःखादिवैचित्र्यात्प्रतिशरीरं भिन्नः । स च न परमाणुः । शरीरव्यापिसुखानुपलब्धिप्रसंगात् । न मध्यमपरिमाणः । तथासत्य
नित्यत्वप्रसंगे कृतनाशाकृताभ्यागमप्रसंगात् । तस्मान्नित्यो विभुर्जीवः । मनसो लक्षणमाह । सुखेति । स्पर्शरहितत्वे सति क्रियावत्त्वं म
नसो लक्षणं । मनो विभज्यते । तच्चेति । एकैकस्यात्मनः एकैकं मनः । [illegible] नामनेकत्वात् मनसो प्यनेकत्वमित्यर्थः । परमाणुरूपमि
त्यति । मध्यमपरिमाणत्वे ऽनित्यत्वप्रसंगादित्यर्थः । ननु मनो विभु स्पर्शरहितत्वात् आकाशवदिति चेन्न । मनसो विभुत्वे [illegible] ३।
नःसंयोगस्यासमवायिकारणस्याभावात् ज्ञानानुत्पत्तिप्रसंगात् । नन्वविभुद्वयस्य संयोगोस्त्विति वाच्यं । तत्संयोगस्य नित्यत्वेन
सुषुप्त्यभावप्रसंगात् । पुरीतति व्यतिरिक्तप्रदेशात्ममनःसंयोगस्य सर्वदा विद्यमानत्वात् । अणुत्वे तु यदा मनः पुरीततिप्रविशति त
दा सुषुप्तिः । यदा निःसरति तदा ज्ञानोत्पत्तिरित्यणुत्व [illegible] सिद्धिः । रूपं लक्षयति । चक्षुरिति । संख्यादावतिव्याप्तिवारणाय मा
त्रपदं । रू [illegible] पत्वेऽतिव्याप्तिवारणाय गुणपदं । ननु अव्याप्यवृत्तिनीलादिसमुदायएव चित्ररूपमिति चेन्न । रूपस्य व्याप्य
वृत्तित्वनियमात् । ननु चित्रपटे ऽवयवरूपस्य प्रतीतिरिति चेन्न । रूपरहितत्वेन पटस्य अप्रत्यक्षत्वप्रसंगात् । नवरूपवत्त्व
मेव तत्र प्रत्यक्षत्वप्रयोजकं । गौरवात् । तस्मात्पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धिः । रसं लक्षयति । रसनेति । रसत्वेऽतिव्या
प्तिवारणाय गुणपदं । गंधं लक्षयति । घ्राणेति । गंधत्वेऽतिव्याप्तिवारणाय गुणपदं । स्पर्शं लक्षयति । त्वगिति । स्पर्शत्वेऽति

व्याप्तिवारणाय गुणपदं। संयोगादावतिव्याप्तिवारणाय मात्रपदं। पाकजमिति। पाकस्तेजःसंयोगः। तेन पूर्वरूपं नश्यति
रूपांतरमुत्पद्यत इत्यर्थः। अत्र परमाणुष्वेव पाकः। न द्व्यणुकादौ। आपाकनिक्षिप्ते घटे परमाणुरूपांतरोत्पत्तौ श्या
मघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः। तत्र परमाणवः समवायिकारणं तेजःसंयोगः असमवायिका
रणं। अदृष्टादिकं निमित्तकारणं। द्व्यणुकादिरूपे कारणरूपं असमवायिकारणमिति पीलुपाकवादिनः। सर्वघट
स्य नाशं विनैवावयविन्यवयवेषु परमाणुपर्यंतेषु युगपद्रूपांतरोत्पत्तिरिति पिठरपाकवादिनो नैयायिकाः। अतए
व पार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः। अन्यज्जलादावित्यर्थः। नित्यगतमिति। परमाणुगतमित्यर्थः। अनि
त्यगतमिति। द्व्यणुकादिनिष्ठमित्यर्थः। रूपादिचतुष्टय[illegible]। उद्भूतत्वं प्रत्यक्षत्वप्रयोजको धर्मः। तदभा
वः अनुद्भूतत्वं। संख्यां लक्षयति। एकेति। परिमाणं लक्षयति। मानेति। परिमाणं विभजते। तच्चेति। भावप्रधानो नि
र्देशः। अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः। पृथक्त्वं लक्षयति। पृथगिति। इदमस्मात्पृथगिति व्यवहारकारणमि
त्यर्थः। संयोगं लक्षयति। संयुक्तेति। इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थः। संख्यादिलक्षणेषु सर्वत्रापि कालादावति पृथिव
व्याप्तिवारणाय असाधारणेति। संयोगो द्विविधः। कर्मजः संयोगजश्च। आद्यो हस्तक्रियया पुस्तकसंयोगः। द्वितीयो

पदेषु योगरूढिः। अवयवशक्तिर्योगः। समुदायशक्तिः रूढिः। नियतपदज्ञानार्थं समुदायशक्तिः। अन्यथा पंकजमुदेऽपि योगप्रसंगः।
इतरान्विते शक्तिरिति प्राभाकराः। अन्वयस्य वाक्यार्थतया भानसंभवादन्वयांशेऽपि शक्तिर्न कल्पनीयेति गौतमीयाः। आ
कांक्षेति। आकांक्षादिज्ञानमित्यर्थः। अन्यथा आकांक्षादिभ्रमाच्छाब्दभ्रमो न स्यात्। आकांक्षां लक्षयति। पदस्येति। योग्य
तालक्षणमाह। अर्थेति। संनिधिं लक्षणमाह। पदानामिति। अविलंबेन पदार्थोपस्थितिः संनिधिः। उच्चारणं तदुपयोगि
तया उक्तं। गौरश्व इति। घटः कर्मत्वं इत्यनाकांक्षोदाहरणं। दृष्टार्थं। वाक्यं विभजते। वाक्यं द्विविधमिति। वैदिकस्य विशेषमा
ह। वैदिकं ईश्वरोक्तत्वादिति। ननु वेदस्यानादित्वात् कथं ईश्वरोक्तत्वमिति चेन्न। वेदः पौरुषेयः। वाक्यसमूहत्वात्।
भारतादिवत्। न च स्मर्यमाणकर्तृकत्वमुपाधिः। गौतमादिभिः शिष्यपरंपरया वेदेऽपि कर्तृस्मरणेन साधनव्यापकत्वात्।
तस्मात्तपस्तपानात्त्रयो वेदा अजायन्त इति श्रुतेश्च। ननु वर्णा नित्याः स एवायं गकार इति प्रत्यभिज्ञाबलात्। तथा च कथं
वेदस्यानित्यत्वमिति चेन्न। उत्पन्नो गकारो नष्टो गकार इति प्रतीत्या वर्णानामनित्यत्वात्। सोऽयं गकार इति प्रत्यभिज्ञा
याः सेयं दीपज्वालेतिवत्। जात्यालंबनत्वात्। वर्णानां नित्यत्वेऽपि आनुपूर्वीविशिष्टवाक्यस्यानित्यत्वाच्च। तस्मात्
ईश्वरोक्तो वेदः। मन्वादिस्मृतीनां आचाराणां च वेदमूलकतया प्रामाण्यं। स्मृतिमूलवाक्यानामिदानीं अनध्यापनात् तन्मू

लन्नता कावित्क्षा खोऽस्तं नेतिकथ्यते। ननुपमानं वेदवाक्यो सादृस्य कल्पयितुमशक्यत्तयाविप्रकीर्णवादस्यायुक्तत्वात्। नित्या
नुमेयावृद्धो न्तलमिति चेन्न। तयापि वर्णानुपूर्व्या ज्ञानात्तावेन बोधकत्वासंभवात्। नन्वेतानि पदानि स्मारितार्थसंसर्गवं
ति। आकांक्षादिमत्पदकदंबकत्वात् मद्वाक्यवत्। इत्यनुमानादेव संसर्गज्ञानसंभवात्। शब्दो न प्रमाणांतरमिति चेन्न। अ
नुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणस्य शब्दात् प्रत्येमीत्यनुव्यवसायसाक्षिकस्य सर्वसंमतत्वात्। नन्वर्थापत्तिरपि प्र
माणांतरमस्ति पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा पीनत्वा[illegible]न्यथानुपपत्त्या रात्रिभोजनमर्थापत्त्या कल्प्यनं
इति चेन्न। देवदत्तो रात्रौ भुंक्ते दिवा अभुंजानत्वे सति पीनत्वात्। इत्यनुमानमानेनैव रात्रिभोजनस्य सिद्धत्वात्। शा
ते पंचाशदिति संभवोऽप्यनुमानमेव। इह वटे यक्षस्तिष्ठतीत्यैतिह्यमपि अज्ञातमूलवक्तृकशब्द एव। चेष्टापि शब्दा
नुमानद्वारा व्यवहारहेतुरिति न मानांतरं। तस्मात्प्रत्यक्षानुमानोपमानशब्दाः चत्वार्येव प्रमाणानि। ज्ञानानां त
द्वति तत्प्रकारकत्वं स्वतो ग्राह्यं परतो वेति विचार्यते। तत्र विप्रतिपत्तिः। ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञा ११
नग्राहकसामग्रीग्राह्यं [illegible] न वा। अत्र विधिकोटिः स्वतस्त्वं। निषेधकोटिः परतस्त्वं। अनुमानग्राह्यत्वे शुभिव
न सिद्धसाधनवारणाय यावदिति। इदं ज्ञानं अप्रमेति ज्ञानेन प्रामाण्याग्रहात्। बाधवारणाय अप्रामाण्याग्राहकेति।
इदं ज्ञानं अप्रमेत्यनुव्यवसायनिष्ठप्रामाण्यग्राहकस्याप्रामाण्यग्राहकत्वाभावात् स्वतस्त्वं न स्यात्। अतस्तदिति। त

स्मिन्प्रामाण्याग्रे: प्रामाण्याग्राहकेत्यर्थः। उत्पन्नस्यैव व्यवसाये प्रामाण्यग्राहकस्यापि अनुव्यवसायेन तद्ग्राहकत्वात् स्वतस्त्व
सिद्धिः। ननु स्वत एव प्रामाण्यं गृह्यते। घटमहं जानामीत्यनुव्यवसायेन घटघटत्वयोरिव तत्संबंधस्यापि विषयीकरणात्। व्य
वसायरूपप्रत्यासत्तेः सत्वात्। पुरोवर्तिनि प्रकारसंबंधस्यैव प्रमात्वपदार्थत्वादिति चेन्न। स्वतःप्रामाण्यग्रहे जलज्ञानं
प्रमा न वेत्यनभ्यासदशायां प्रमात्वसंशयो न स्यात्। अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात्। तस्मात् स्वतोग्राह्यत्वाभा
वात्परतोग्राह्यत्वं। तथाहि। प्रथमं जलज्ञानानंतरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा। समर्थप्रवृत्तिजनक
त्वात्। यन्नैवं तन्नैवं। यथाऽप्रमेति। व्यतिरेकिणा प्रमात्वं निश्चीयते। द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टांतेन तज्जातीयत्वलिंगे
ना[illegible]न्वयव्यतिरेकिणापि गृह्यते। प्रमाया गुणजन्यत्वं उत्पत्तौ परतस्त्वं। प्रमासाधारणकारणं गुणः। अप्रमासा
धारणकारणं दोषः। तत्र प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः। अनुमितौ व्यापकवति व्याप्यज्ञानं। उपमितौ यथार्थ
सादृश्यज्ञानं। शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्यादि ऊहनीयं। पुरोवर्तिनि प्रकाराभावस्य व्यवसायेनानुपस्थितत्वात्।
अप्रमात्वं परत एव गृह्यते। पित्तादिदोषजन्यत्वमुत्पत्तौ प[illegible]रतस्त्वं। ननु सर्वज्ञानानां यथार्थत्वादयथार्थज्ञानमेव
नास्ति। न च शुक्ताविदं रजतमिति ज्ञानात् प्रवृत्तिदर्शनान्नान्यथाख्यातिसिद्धिरिति वाच्यं। रजतस्मृतिपुरोवर्तिज्ञानाभ्या
मेव प्रवृत्तिसंभवात्। उपस्थितेष्टभेदाग्रहस्यैव सर्वत्र प्रवर्तकत्वेन नेदं रजतमित्यांपाद्रतिप्रत्ययाभावादिति चेन्न। २

सत्पर जतस्यद्दे पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य लाघवेन प्रवृत्तिजनकतया शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वे
न विशिष्टज्ञान[illegible]स्यैव कल्पनात् । अयथार्थानुभवं विभजते । अयथार्थेति । स्वप्नस्य मानसविपर्ययरूपत्वात् । न
त्रैविध्यविरोधः । संशयलक्षणमाह । एकेति । घटपटाविति समूहालम्बने नातिव्याप्तिवारणाय एकेति । घटत्वव्यामितिपा
शवति व्याप्तिवारणाय [illegible] विरुद्धेति । पटत्वविरुद्धघटत्ववानित्यत्रातिव्याप्तिवारणाय नानेति । विपर्ययलक्षणमाह । मि
थ्येति । तदभाववति तत्प्रकारकनिश्चय इत्यर्थः । तर्कं लक्षयति । व्याप्येति । यद्यपि तर्को विपर्यये तन्तर्भवति तथापि
प्रमाणानुग्राहकत्वात् पृथक्कीर्तनं । स्मृतिं विभजते । स्मृतिरिति । सुखं लक्षयति । सर्वेषामिति । सुखत्वमित्या
द्यनुव्यवसायगम्यसुखत्वादिकमेव लक्षणं । यथाश्रुतं दुःखरूपमकृत्यमिति द्रष्टव्यं । संस्कारं विभजते । संस्का न७
र इति । संस्कारत्वजातिमान् संस्कारः । वेगस्याश्रयमाह । पृथिव्यन्नवारीति । अनुभवेति । आत्मादाववृतिव्याप्तिवार
णाय । जन्येति । अनुभवध्वंसेऽतिव्याप्तिवारणाय स्मृतीति । स्मृतेरपि संस्कारजन्यत्वेन कथनवीनेत्युक्तं ।
स्थितस्थापकं लक्षयति । अन्यथेति । संख्यादयोऽष्टौ नैमित्तिकद्रवत्ववेगस्थितस्थापकाः सामान्यगु १४ शि.
णाः । अन्ये रूपादयो विशेषगुणाः । द्रव्यविभाजकोपाधिद्वयसमानाधिकरणावृत्तिजातिमत्त्वं विशेषगुणत्वं
कर्मणो लक्षणमाह । चलनेति । उत्क्षेपणादीनां कार्यभेदमाह । ऊर्ध्वेति । शरीरेति । वक्रतासंपादकमाकुंचनं । ऋ

ऋजुतासंपादकं प्रसारणमित्यर्थः । आश्रयमाह । पृथिव्यादीति । सामान्यलक्षणमाह । नित्यमिति । परमाणुपरिमाणादावतिव्याप्तिवारणा
यानेकेति । अनुगतत्वं समवेतत्वं तेन नानाभाववतिव्याप्तिः । विशेषं लक्षयति । नित्येति । समवायं लक्षयति । नित्यमिति । संयोगेऽ
तिव्याप्तिवारणाय नित्येति । आकाशादावतिव्याप्तिवारणाय संबन्ध इति । अयुतसिद्धिलक्षणमाह । ययोरिति । नीलो घट इति
विशिष्टप्रतीतिः विशेषणविशेष्यसंबन्धविषया विशिष्ट प्रत्ययत्वात् । दण्डीति प्रत्ययवत् । इति समवायसिद्धिः । अवय
वावयविनाविति । द्रव्यसमवायिकारणमवयवः । जन्यद्रव्यमवयवि । प्रागभावं लक्षयति । अनादिरिति । आकाशादाव
तिव्याप्तिवारणाय सान्त इति । घटादावतिव्याप्तिवारणायानादिरिति । प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनकः भ
विष्यतीति व्यवहारहेतुः प्रागभावः । ध्वंसं लक्षयति । सादिरिति । घटादावतिव्याप्तिवारणायानन्त इति । आकाशादावति
व्याप्तिवारणाय सादिरिति । प्रतियोगिजन्यः प्रतियोगिसमवायिवृत्तिः ध्वस्तव्यवहारहेतुः ध्वंसः । अत्यन्ताभावं लक्षयति ।
त्रैकालिक इति । अन्योन्याभावेऽतिव्याप्तिवारणाय संसर्गावच्छिन्नेति । ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिक इ
ति । अन्योन्याभावं लक्षयति । तादात्म्येति । प्रतियोगितावच्छेदकआरोप्यसंसर्गतादृक्प्रतियोगिकयात्यन्ताभाव।
न्योन्याभावयोर्वैलक्षण्यं । केवलदेवदत्ताद्यभावादेर्घटाभाव इति । अतो या विशिष्टाभावः एकत्वविशिष्टाभाव इति प्रतीता द्वित्वाव
च्छिन्नाभावः संयोगसंबन्धेन घटवति समवायसंबन्धेन घटाभावः । तत्र तेन घटाभावात् घटत्वावच्छिन्नप्रतियो
गिकसामान्याभावोऽतिरिक्तः । एवमन्योन्याभावेऽपि । घटत्वावच्छिन्नपटो नास्तीति व्यधिकरणधर्मावच्छिन्नाभावो

ने४ म३

नांगीक्रियते। पटे घटत्वं नास्तीति तस्यार्थः। अतिरिक्तसंसर्गैस्वसकेवलान्वयी। सामयिकाभावोऽत्यंताभावएव समयविशेषे प्रतीयमानः।
घटाभाववति घटानयने ऽत्यंताभावस्यान्यत्र गमनाभावेपि अप्रतीतेः। घटापसरणे सति प्रतीतेः। नतत्र घटसंयोगप्राग
भावप्रध्वंसयोरत्यंताभावप्रतीतिनियामकत्वं कल्प्यते। घटवति तत्संयोगप्रागभावप्रध्वंसयोरसत्वात्। अत्यंताभावस्या
प्रतीतिः। घटापसरणे च संयोगध्वंसत्वात् प्रतीतिरिति। केवलाधिकरणादेव नास्तीति धीः अतएवाभावपदार्थाभावो नपदा
र्थांतरमिति गुरुमतन्न। अभावानंगीकारे केवलास्यानिर्वक्तुमशक्यत्वात्। अभावोभावाभावएव नातिरिक्तः। अ
नवस्थाप्रसंगात्। ध्वंसप्रागभावः प्रागभावध्वंसश्च प्रतियोग्येव। अभावाभावोऽतिरिक्त एव तृतीयाभा
वस्य प्रथमत्वात् नानवस्थेति नवीनाः। ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवाद
जल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगम इति न्यायशास्त्रे षोडशपदार्थाना
मुक्तत्वात्कथं सप्तैवेत्यत आह। सर्वेषामिति। सर्वेषां सप्तस्वेवांतर्भाव इत्यर्थः। आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृ ५
त्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति द्वादशविधप्रमेयं। प्रवृत्तिः धर्माधर्मौ रागद्वेषमोहाः दोषाः।
रागेच्छा द्वेषो मन्युः मोहः शरीरादावात्मत्वभ्रमः। प्रेत्यभावो मरणं। फलं भोगः। अपवर्गो मोक्षः। सच स्वसमा
नाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः। प्रयोजनं सुखं दुःखहानिश्च। दृष्टांतो

संशय४ पिलु लुध

महानसादिः। प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धांतः। निर्णयो निश्चयः प्रमाणफलं। तत्त्वबुभुत्सोः कथा वादः। जयसाधनवति
विजिगीषुकथा जल्पः। स्वपक्षस्थापनाहीना कथा वितंडा। कथा नाम नानावक्तृकः पूर्वोत्तरपक्षवाक्यसंदर्भः। अभिप्राया
न्तरेण प्रयुक्तस्य वाक्यस्यार्थांतरं प्रकल्प्य दूषणं छलं। असदुत्तरं जातिः। साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यवि
कल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रतिदृष्टांतानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिकार्य
कार्य५ समानित्यानित्यसमा जातयः। वादिनोऽपजयहेतुर्निग्रहस्थानं। प्रतिज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रति
ज्ञासंन्यासो हेत्वंतरं। अर्थांतरं निरर्थकं। अविज्ञातार्थमपार्थकं। अप्राप्तकालं न्यूनमधिकं पुनरुक्तं अननुभा
षणं अज्ञानं अप्रतिभा विक्षेपो मतानुज्ञा। पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धांतो हेत्वाभासश्च। नि
ग्रहस्थानानि। शेषं सुगमं। ननु कारणं नलसंयोगे सत्यपि प्रतिबंधके सत्यपि दाहाद्यनुत्पत्तेः। शक्तिः पदार्थांत
रमिति चेन्न। प्रतिबंधकाभावस्य कार्यमात्रे कारणत्वेनैव शक्तेरनुपयोगात्। कारणस्यैव शक्तिपदार्थत्वात्।
ननु तस्मादिना कांस्यादेः शुद्धिदर्शनात्। आधेयशक्तिरंगीकार्येति चेन्न। भस्मादिसंयोगस्य समानकालीनअस्पृ न२
श्यस्पर्शप्रतियोगिकयावद्दोषध्वंससहितभस्मादिसंयोगध्वंसस्य शुद्धिपदार्थत्वात्। स्वत्वमपि न पदार्थांतरं। यथे

तावि५ भा१ ग्रभ६ त्व३

ष्टविनियोगयोग्यत्वस्य स्वरूपत्वस्वरूपत्वात्। तदवच्छेदकं च जातिग्रहादिलभ्यं च समेवेति। अथ विधिर्निरूप्यते। प्रयत्नजन
कचिकीर्षाजनकं ज्ञानं विधिर्विषयो विधिः। तत्प्रतिपादकं लिङादिर्वा। कृत्यसाध्ये प्रवृत्त्यदर्शनात् कृतिसाध्यताज्ञानं प्र
वर्तकं। नांच विषभक्षणादौ प्रवृत्तिप्रसंगः। इष्टसाधनता लिंगं कृतिसाध्यताज्ञानस्य कामस्य च विहितकालजी
वित्वनिमित्तज्ञानजन्यत्वेन नित्यनैमित्तिकस्थले प्रवर्तकत्वात्। न चाननुगमः। स्वविशेषणवत्ताप्रतिसंधान
जन्यत्वस्यानुगतत्वादिति गुरवः। तन्न। लाघवेन कृतिसाध्येष्टसाधनताज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजन
कत्वात्। न च नित्ये इष्टसाधनताभावादप्रवृत्तिप्रसंगः। तस्यापि तत्तद्वायपरिहारस्य पापक्षयस्य च फलत्व
कल्पनात्। तस्मात् कृतिसाध्येष्टसाधनत्वमेव लिंगाद्यर्थः। ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्य
त्र लिंगः स्वर्गसाधनं कार्यं प्रतीयते। यागस्याशुविनाशिनः कालांतरभाविस्वर्गसाधनत्वायोग्यत्वात्।
यस्थायि कार्यमपूर्वमेव लिंगर्थः। कार्यं कृतिसाध्यं। कृतेः सविषयत्वात् विषयाकांक्षायां यागो विषयत्वेन धात्व
अन्वेति। कस्य कार्यमिति नियोज्याकांक्षायां स्वर्गकामपदं नियोज्यपरतयान्वेति। कार्यबोद्धा नियोज्यः।
तेन ज्योतिष्टोमनामकयागविषयकं स्वर्गकामस्य कार्यमिति वाक्यार्थः संपद्यते। वैदिकलिंगत्वाद्यावज्जी

वमग्निहोत्रं जुहुयादिति नित्यवाक्येप्यपूर्वमेव वाच्यं कल्प्यते। आरोग्यकामो भैषज्यपानं कुर्यादित्यादौ लौकिकलिङः क्रि
याकार्यलक्षणेति चेन्न। यागस्याप्ययोग्यतानिश्चयाभावेन साधनतायाः प्रतीत्यनंतरं तन्निर्वाहार्थमेवांतरव्या
पारतया अपूर्वकल्पनात्। कीर्तनादिना नाशश्रुतेर्न यागध्वंसो व्यापारः। लोकव्युत्पत्तिबलात् क्रियायामेव कृति
साध्येष्टसाधनत्वं लिङो बोध्यत इति लिंगत्वेन रूपेण विध्यर्थत्वं। आख्यातत्वेन यत्नार्थकत्वं। पचतिपा
कं करोतीति विवरणदर्शनात्। किं करोतीति प्रश्ने पचतीत्युत्तराच्चाख्यातस्य प्रयत्नार्थत्वनिश्चयात्। र
थो गच्छतीत्यादौ अनुकूलव्यापारलक्षणा। देवदत्तः पचति देवदत्तेन पच्यते तंडुलः इत्यादौ कर्तृकर्मणो
नाख्यातार्थत्वं। किंतु जते कर्त्रादीनामेव। तयोराक्षेपादेव लाभः। प्रजयतीत्यादौ धातोरेव प्रकर्षे शक्तिः।
उपसर्गाणां द्योतकत्वमेव न वनतत्र शक्तिरस्ति। पदार्थज्ञानस्य परमप्रयोजनं मोक्षः तथाहि। आत्मा वा अरे
द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या श्रवणादीनां साक्षात्कारहेतुत्वबोधनात्। श्रुत्यादे
हादिविलक्षणात्मज्ञानेस्य स्पर्शभावना इति श्रुतियुक्त्यनुसंधानरूपमननसाध्यत्वात्। मननोपयोगिमे
नेपदार्थनिरूपणद्वारा शास्त्रस्यापि मोक्षोपयोगः। तदनंतरं श्रुत्याद्युपदिष्टयोगविधिना निदिध्यासनेन तत

दनंतरं देहविलक्षणात्मसाक्षात्कारे सति देहादावहमभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात्। प्रवृत्त्य
भावे धर्माधर्मयोरभावात्। जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमदुःखध्वंसलक्षणो मोक्षो
जायते। ज्ञानमेव मोक्षसाधनं। मिथ्याज्ञाननिवृत्तेर्ज्ञानमात्रसाध्यत्वात्। तमेव विदित्वातिमृत्युमेति। नान्यः
पंथा विद्यतेऽयनायेति साधनांतरनिषेधाच्च। ननु स्वानुष्ठितं विज्ञानं कर्मणा कं मा हन्ति इति कर्मणोऽपि
मोक्षसाधनत्वस्मरणात्। ज्ञानकर्मणोः समुच्चय इति चेन्न। नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं।
ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेत्। अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः इत्यादिना क
र्मणो ज्ञानसाधनत्वप्रतिपादनात्। ज्ञानद्वारैव कर्म मोक्षसाधनं। तस्मात्तत्त्वपदार्थज्ञानस्य ... क्षपुरिति
परं प्रयोजनमिति सर्वं रमणीयं॥ इति श्रीमदन्नंभट्टोपाध्यायकृततर्कसंग्रहटीकादीपिका समाप्ता।
संवत् १७२५ वर्षे शाके १५९० प्रवर्त्तमाने ज्येष्ठमासे सिततरपक्षे पंचमी बुधे उंडरपुरस्थाने
तनज्योतिर्विद्ब्राह्मणजिस्नुना शंकरेण इदं लिखितं पुस्तकं स्वयपठनार्थं वा परोपकारार्थं॥ ॥श्रीरस्तु

वा